**अथवा**

(ग) यथेष्टम् अवतरण**द्वयं** सप्रसङ्ग व्याख्येयम् –

(i) व्यापारत्वञ्च धात्वर्थफलजनकत्वे सति धातुवाच्यत्वम् । अनुकूलत्वं संसर्गः । अनुकूलत्वञ्च फलनिष्ठजन्यतानिरूपितजनकत्वम् । 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति निरुक्तोक्तेर्व्यापारमुख्यविशेष्यको बोधः ।

(ii) सकर्मकत्वञ्च फलव्यधिकरणव्यापारवाचकत्वम् । फलसमानाधिकरणव्यापारवाचकत्वम् अकर्मकत्वम् । क्वचित्तु फलांशाभावादकर्मकत्वम् । यथा अस्त्यादौ केवलं सत्तादिरेवार्थः । फलांशस्य सूक्ष्मदृष्ट्याऽप्यप्रतीतेः ।

(iii) किञ्च यत्नोऽपि व्यापारसामान्यं धातुत एव लभ्यते स्थालीस्थे यत्ने पचिना कथ्यमाने 'स्थाली पचति' इति 'कारके' इत्यधिकारसूत्रे भाष्यप्रयोगात् अनन्यलभ्यस्यैव शब्दार्थत्वात् कृतौ शक्तेरुक्तिसम्भव एव न ।



**Roll No. ..........................** **Total Pages : 04**

# MDQ/D-23 6608

## VYAKARANADARSHANAM (1)
## Paper XIII/SKT-SC-303-B, Group-B
## Grammar

Time : Three Hours] [Maximum Marks : 80

**नोट** : सर्वेऽपि प्रश्नाः अनिवार्याः सन्ति ।

**1.** अधोलिखिताः **चत्वारः** संक्षिप्तोत्तरात्मकाः अनिवार्याः प्रश्नाः समाधेयाः : **4×4=16**

(क) 'ऊहः खल्वपि' इति भाष्योक्तं शब्दानुशासनस्य प्रयोजनं स्पष्टयत।

(ख) 'इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्' इति वाक्यपदीयोक्तिः व्याख्येया ।

(ग) 'शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः । प्रकृतिप्रत्ययास्तत्तदर्थवाचका इति तदर्थः' इति नागेशवचनं व्याख्यायताम् ।

(घ) 'अस्तिभवतिवर्ततिविद्यतीनामर्थः सत्ता' इति नागेशोक्तिः व्याख्येया ।

**2.** यथेष्टं वार्तिक**द्वयं** संस्कृतमाध्यमेन सप्रसङ्गं व्याख्येयम् – **2×4=8**

(क) लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः ।

(ख) सर्वे देशान्तरे ।

(ग) सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः ।

**3.** शब्दस्य ज्ञाने धर्मः, अथवा प्रयोगे ? महाभाष्यदिशा संस्कृतमाध्यमेन विवेचयत । **8**

**अथवा**

'व्याकरणम्' इत्यस्य शब्दस्य कः पदार्थः ? महाभाष्यमाश्रित्य संस्कृतमाध्यमेन विवेचनीयम् ।

4. यथेष्टं कारिका**द्वयं** सप्रसङ्गं व्याख्येयम् - **2×4=8**

(क) प्राप्तरूपविभागाया यो वाचः परमो रसः ।
यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ॥

(ख) प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात् ।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ॥

(ग) यो य उच्चार्यते शब्दः नियतं न स कार्यभाक् ।
अन्यप्रत्यायने शक्तिर्न तस्य प्रतिबध्यते ॥

5. (क) वाक्यपदीयमाश्रित्य शब्दस्य महत्त्वं विवेचनीयम् । **8**

**अथवा**

(ख) 'नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते' इति वाक्यपदीयोक्तिं विवेचयत ।

6. (क) परमलघुमञ्जूषामाश्रित्य रूढिः, योगः, योगरूढिः च इति त्रिविधां शक्तिं विवेचयत । **8**

**अथवा**

(ख) 'प्रयोजनवती', 'रूढा' च इति द्विविधां लक्षणां परमलघुमञ्जूषामाश्रित्य सोदाहरणं विवेचयत ।

**अथवा**

(ग) यथेष्टम् अवतरण**द्वयं** सप्रसङ्ग व्याख्येयम् :



(i) तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिर्वाच्यवाचकभावापरपर्याया । तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यम् । तदेव सम्बन्धः। उभयनिरूपित- तादात्म्यवानुभय इति अर्थपदयोर्व्यवहारात्।

(ii) न च 'शक्तिभ्रमाद् बोधोऽसाधुशब्देषु' इति वाच्यम्; निस्सन्देहप्रत्ययस्य बाधकं विना भ्रमत्वायोगात् । अत एव स्त्रीशूद्रबालादीनामुच्चारिते साधावर्थसंशये तदपभ्रंशेनार्थनिर्णयः। अत एव 'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनिर्णयः' इति भाष्यम्, 'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः' इति हरिकारिका च सङ्गच्छते ।

(iii) विशिष्टार्थबोधकशब्दस्य पदार्थैकदेशे लक्षणायां जहदजहल्लक्षणेति व्यवहरन्ति वृद्धाः । वाच्यार्थे किञ्चिदंशत्यागः किञ्चिदंशपरिग्रहश्च । अत्र ग्रामैकदेशे पटैकदेशे च दग्धे 'ग्रामो दग्धः', 'पटो दग्धः' इति व्यवहारः । **16**

7. (क) धात्वर्थविषयकं मीमांसकमतं परमलघुमञ्जूषामाश्रित्य विस्तरेण विवेचयत ।

**अथवा**

(ख) परमलघुमञ्जूषादिशा क्रियायाः सिद्धत्वविषये साध्यत्वविषये च समीक्षा करणीया ।